सोऽपि रुद्रपदं याति किं पुनर्मानवा गुह ॥
सप्तविंशतिरुद्राक्षमालया देहसंस्थया ।
यः करोति नरः पुण्यं सर्व्वं कोटिगुणं भवेत् ॥
यो ददाति द्विजातिभ्यो रुद्राक्षं भुवि षण्मुख ।
तस्य प्रीतो भवेद्रुद्रः स्वपदञ्च प्रयच्छति ॥
विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः ।
स याति नरकान् घोरान् यावदिन्द्राश्चतुर्द्दश ॥"
इति पद्मपुराणे रुद्राक्षमाहात्म्यम् । इति तन्त्रसारः ॥

रुद्राणी, स्त्री, (रुद्रस्य पत्नी । "इन्द्रवरुणभवशर्व्वरुद्रेति ।" ४ । १ । ४९ । इति ङीष् ।) दुर्गा । इत्यमरः ॥ तस्या व्युत्पत्तिर्यथा,—
"रुदसैन्यं रुद्राणी रौद्रं हन्ति करोति या ॥"
इति देवीपुराणे ४५ अध्यायः ॥
रुद्रजटा । इति राजनिर्घण्टः ॥

रुद्रावासः, पुं, (रुद्रस्य आवासः ।) काशी । इति केचित् ॥

रुद्रारिः, पुं, (रुद्रः अरिर्यस्य ।) कामदेवः । इति केचित् ॥

रुद्री, स्त्री, वीणाभेदः । इति शब्दरत्नावली ॥ अस्या विवरणं रुद्रवीणाशब्दे द्रष्टव्यम् ॥

रुध, इर् ध ञ औ ष्ण आवृतौ । इति कविकल्पद्रुमः ॥ (रुधा०-उभ०-सक०-अनिट् ।) इर्, अरुधत् अरौत्सीत् । ध ञ, रुणद्धि रुन्धे । औ, रोद्धा । ष्ण, रुद्धोऽस्ति । इति दुर्गादासः ॥

रुध, य ङ औ कामे । अनुपूर्व्वोऽयम् । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-सक०-अनिट् ।) य ङ, अनुरुध्यते धर्मं लोकः । औ, अनुरोद्धा । इति दुर्गादासः ॥

रुधिरं, क्ली, (रुणद्धि रुध्यते इति वा । रुध + "इषिमदिमुदीति ।" उणा० १ । ५२ । इति किरच् ।) शरीरस्थरक्तवर्णधातुः । तत्पर्य्यायः । रक्तम् २ अस्रम् ३ त्वग्जम् ४ कीलालम् ५ क्षतजम् ६ शोणितम् ७ लोहितम् ८ असृक् ९ शोणम् १० लोहम् ११ चर्म्मजम् १२ । इति राजनिर्घण्टः ॥ (यथा,—
"तद्विशुद्धं हि रुधिरं बलवर्णसुखायुषा ।
युनक्ति प्राणिनं प्राणः शोणितं ह्यनुवर्त्तते ॥"
"बलदोषप्रमाणाद्वा विशुद्ध्या रुधिरस्य वा ।
रुधिरं स्रावयेज्जन्तोराशयं प्रसमीक्ष्य वा ॥"
इति चरके सूत्रस्थाने चतुर्विंशेऽध्याये ॥
"चतुर्व्विधं यदेतद्धि रुधिरस्य निवारणम् ।
सन्धानं स्कन्दनञ्चैव पाचनं दहनन्तथा ॥
व्रणं कषायः सन्धत्ते रक्तं स्कन्दयते हिमम् ।
तथा सम्पाचयेद्भस्म दाहः सङ्कोचयेत् शिराः ॥
अस्कन्दमाने रुधिरे सन्धानानि प्रयोजयेत् ।
सन्धाने सस्यमाने तु पाचनैः समुपाचरेत् ॥
कल्पैरेतैस्त्रिभिर्वैद्यः प्रयतेत यथाविधि ।
असिद्धिमत्सु चैतेषु दाहः परम इष्यते ॥
सशेषदोषे रुधिरे न व्याधिरतिवर्त्तते ।
सावशेषे ततः स्थेयं न तु कुर्य्यादतिक्रमम् ॥
देहस्य रुधिरं मूलं रुधिरेणैव धार्य्यते ।
तस्माद्यत्नेन संरक्ष्यं रक्तं जीव इति स्थितिः ॥"
इति सुश्रुते सूत्रस्थाने चतुर्द्दशेऽध्याये ॥
रुधिरस्रावेऽनध्ययनमुक्तं यथा, मनौ । ४।१२२ ।
"रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते ।
सामध्वनावृग्यजुषी नाधीयीत कदाचन ॥")
कुङ्कुमम् । इत्यमरः ॥ (यथा, रघुः । ११।२० ।
"राममन्मथशरेण ताडिता
दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता
जीवितेशवसतिं जगाम सा ॥")

रुधिरः, पुं, (रुध + किरच् ।) मङ्गलग्रहः । इति मेदिनी ॥

रुधिराख्यं, क्ली, (रुधिरमिति आख्या यस्य ।) मणिभेदः । यथा,—
"हुतभु...मादाय दानवस्य यथेप्सितम् ।
नर्म्मदायां निचिक्षेप किञ्चिद्भौमादि भूतले ॥
तत्रेन्द्रगोपकलितं शुकवक्त्रवर्णं
संस्थानतः प्रकटपीलुसमानमात्रम् ।
नानाप्रकारविहितं रुधिराख्यरत्न-
मुद्भूत तस्य खलु सर्व्वसमानमेव ॥
मध्येन्दुपाण्डरमतीवविशुद्धवर्णं
तच्चेन्द्रनीलसदृशं पटलं तुवे स्यात् ।
ऐश्वर्य्यभृत्यजननं कथितं तदेव
पक्वञ्च तत् किल भवेत् सुरवच्चवर्णम् ॥"
इति गारुडे ७८ अध्यायः ॥

रुप, य इर् विमोहे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-सक०-सेट् ।) विमोह आकुलीकरणम् । य, रुप्यति लोकं लोकः । इर्, अरुपत् अरोपीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । इति दुर्गादासः ॥

रुमा, स्त्री, सुग्रीवभार्य्या । विशिष्टलवणाकरः । इति मेदिनी । मे, २७ ॥

रुरुः, पुं, (रम् + "चकिरम्योरुच्चोपधायाः ।" उणा० २।१४ । इति रुः उपधायाश्च उत्वम् ।) असुरः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

रुरुः, पुं, (रौतीति । रु + "रुशातिभ्यां क्रुन् ।" उणा० ४ । १०३ । इति क्रुन् ।) मृगविशेषः । इत्यमरः ॥ (यथा, महाभारते । ३ । ५० । ७ ।
"रुरून् कृष्णमृगांश्चैव मेध्यांश्चान्यान् वनेचरान् ।
वाणैरुन्मथ्य विविधैर्ब्राह्मणेभ्यो न्यवेदयत् ॥")
अस्य मांसगुणाः । स्निग्धत्वम् । गुरुत्वम् । मन्दाग्निबलप्रदत्वञ्च । इति राजनिर्घण्टः ॥ दैत्यभेदः । इति मेदिनी । रे, ७९ ॥ (यथा, कथासरित्सागरे । ५३ । १७१ ।
"एकानंशे शिवे दुर्गे नारायणि सरस्वति ।
भद्रकालि महालक्ष्मि सिद्धिरुरुविदारिणि ॥"
क्रूरसत्त्वविशेषः । तस्य भारुरुङ्क इति नाम । इति भागवतटीकायां श्रीधरः । ५ । २६ । ११ ॥ यथा च देवीभागवते । ८ । २२ । १०—११ ।
"इह लोकेऽमुना ये तु हिंसिता जन्तवः पुरा ।
त एव रुरवो भूत्वा परत्र पीडयन्ति तम् ॥
तस्माद्रौरवमित्याहुः पुराणज्ञा मनीषिणः ।
रुरुः सर्पादतिक्रूरो जन्तुरुक्तः पुरातनैः ॥"
स्वनामख्यातमुनिविशेषः । स तु च्यवनस्य पौत्रः । अयमेव निजायुषोऽर्द्धं दत्त्वा प्रियां जीवयामास । अस्य विवरणं देवीभागवते २ स्कन्धे ८ अध्यायमारभ्य तथा महाभारते १ पर्व्वणि ५ अध्यायमारभ्य द्रष्टव्यम् ॥)

रुबुः, पुं, (रु + कुः ।) एरण्डवृक्षः । इति रत्नमाला ॥ रक्तैरण्डः । इति राजनिर्घण्टः ॥ (एरण्डशब्देऽस्य विषयो ज्ञातव्यः ।)

रुबुकः, पुं, (रुबुरेव । रुबु + स्वार्थे कन् ।) एरण्डवृक्षः । इति रत्नमाला । रक्तैरण्डः । इति राजनिर्घण्टः ॥

रुवुक, पुं, एरण्डवृक्षः । इति रत्नमाला ॥

रुवूकः, पुं, एरण्डवृक्षः । इत्यमरः ॥ (तथास्य पर्य्यायः ।
"शुक्ल एरण्ड आमण्डश्चित्रो गन्धर्व्वहस्तकः ।
पञ्चाङ्गुलो वर्द्धमानो दीर्घदण्डोऽप्यदण्डकः ॥
वातारिस्तरुणश्चापि रुवूकश्च निगद्यते ।
रक्तोऽपरो रुवूकः स्यादुरुवूको रुवूस्तथा ॥
व्याघ्रपुच्छश्च वातारिश्चञ्चुरुत्तानपत्रकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

रुश, औ श हिंसे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-सक०-अनिट् ।) औ, अरुक्षत् । श, रुशति रोक्ष्यति । इति दुर्गादासः ॥

रुष, क क्रुधि । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् ।) क, रोषयति । इति दुर्गादासः ॥

रुष, ञि वधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ञि, रुष्टः रुषितोऽस्ति । रुरोष । इति दुर्गादासः ॥

रुष, य इर् ञि क्रुधि । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) य, रुष्यति भृत्याय भूपालः । इर्, अरुषत् अरोषीत् । अस्मात् पुषादित्वान्नित्यं ङ इत्यन्ये । ञि, रुष्टः रुषितोऽस्ति । इति दुर्गादासः ॥

रुषा, स्त्री, (रुष् + क्विप् । भागुरिमते टाप् ।) अमर्षः । तत्पर्य्यायः । क्रोधः २ मन्युः ३ क्रुधा ४ क्रुत् ५ कोपः ६ प्रतिघः ७ रोषः ८ रुट् ९ । इति हेमचन्द्रः । २ । २१२ ॥

रुषितः, त्रि, (रुष्यति स्मेति । रुष + क्तः । "रुष्यमत्वरसंघुषास्वनाम् ।" ७ । २ । २८ । इति पक्षे इट् ।) क्रोधयुक्तः । यथा,—
"तं नागपाशैर्बलिनन्दनो बली
घ्नन्तं स्वसैन्यं रुषितो बबन्ध ह ॥"
इति श्रीभागवते बाणयुद्धे ६२ अध्यायः ॥

रुष्टः, त्रि, (रुष्यति स्मेति । रुष + क्तः ।"रुष्यमत्वरसंघुषास्वनाम् ।" ७।२।२८ । इति इडभावः ।) क्रोधयुक्तः । यथा,—
"शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ॥"
इति तन्त्रसारः ॥

रुह, ञि ज औ जन्मनि । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-अनिट् ।) ञि, रूढोऽस्ति ।